मिह स्थितम् । कलशेश इति ख्यातं चन्द्रेशात् पश्चिमेन तु । यमतीर्थे नरः स्नात्वा मित्रावरुणदक्षिणे । काललिङ्गं समालोक्य कलिकालभयं कुतः । तत्र भौम चतुर्दश्यां यस्तु यात्रां करिष्यति । अपि पातकयुक्तश्च यमयात्रां न यास्यति । नेपालाच्च महाक्षेत्रादायात् पशुपतिस्त्विह । यत्र पाशुपतो योग उपदिष्टः पिनाकिना । महता देवदेवेन ब्रह्मादिभ्यो विमुक्तये । तस्य संदर्शनादेव पशुपाशैर्वियुज्यते । करवीरकतीर्थाच्च कपालीश इहागतः । कपालमोचने तीर्थे द्रष्टव्यः स प्रयत्नतः । तद्विलोकनमात्रेण ब्रह्महत्या विलीयते । उमापतिर्देविकाया इहागत्य व्यवस्थितः । दृष्टः पशुपतेः प्राच्यां हरेत् पापं चिरार्जितम् । लिङ्गं महेश्वरक्षेत्रादिह दीप्तेशसंज्ञितम् । उपोमापति तिष्ठेत्तु दीप्त्यै चेह परत्र च । भुक्तिमुक्तिप्रदं लिङ्गं दीप्तेशं काशिमध्यगम् । छायारोहणतः क्षेत्रादायातो नकुलीश्वरः । शिष्यैः परिवृतस्तिष्ठेन्महापाशुपतव्रतैः । दक्षिणे हि महादेवात् दृष्टो ज्ञानं प्रयच्छति । अज्ञानं नाशयेत् क्षिप्रं गर्भसंसृतिहेतुकम् । गङ्गासागरतस्त्वागादमरेश इतीरितम् । लिङ्गं यद्दर्शनादेव नामरत्वं हि दुर्लभम् । सप्तगोदावरीतीर्थाद्देवो भीमेश्वरः प्रभुः । प्रकाशते लिङ्गरूपी भुक्त्यै मुक्त्यै नृणामिह । नकुलीशात् पुरोभागे दृष्ट्वा भीमेश्वरं प्रभुम् । महाभीमानि पापानि प्रणश्यन्ति हि तत्क्षणात् । भूतेश्वरात् भस्मगात्रः प्रादुरासीदिह स्वयम् । भीमेशाद्दक्षिणे भागे तदभ्यर्च्यं प्रयत्नतः । सम्यक् पाशुपताद्योगादभ्यस्ताच्च समाः शतम् । यत्प्राप्नोति फलं तस्माद्भस्मगात्रविलोकनात् । नकुलीश्वरतो देवः स्वयम्भुरिति विश्रुतः । आत्मना प्रकटीभूतः काश्यां लिङ्गाकृतिर्हरः । स्वयम्भुलिङ्गं संपूज्य स्नात्वा सिद्धिह्रदे नरः । महालक्ष्मीश्वरपुरो न भूयो जन्मभाग्भवेत् । प्रयागतीर्थं निकषा प्रासादो विद्रुमः प्रभुः । वाराहस्य महानेष वरणी नाम एव हि । विन्ध्यपर्वं ततः प्राप्तो देवं श्रुत्वा समागतम् । सगणं सर्षिदेवञ्च मन्दराद्रत्नकन्दरात् । काश्यां धरणिवाराहो द्रष्टव्यः स प्रयत्नतः । आपत्समुद्रसंमग्नमुद्धरेच्छरणागतम् । कर्णिकाराद्गणाध्यक्षः कर्णिकारप्रसूनरुक् । समभ्यर्च्योऽयं गदाहस्त उपसर्गसहस्रहृत् । तस्माद्धरणिवाराहात् प्रतीच्यां दिशि संस्थितम् । पूजयित्वा गणाध्यक्षं गाणपत्यपदं लभेत् । हेमकूटाद्विहपाक्षं लिङ्गमत्राविरास ह । महेश्वरादवाच्यां तु दृष्टं संसारतारकम् । गङ्गाद्वाराद्धिमस्थेशं लिङ्गं हिमसमप्रभम् । ब्रह्मनालात् प्रतीच्यां च द्रष्टव्यमिह सिद्धिदम् । गणाधिपस्य कैलासात् गणा अन्ये महाबलाः । कैलासाद्रेः समायाताः सप्तकोटिमिताः प्रभो ! । दुर्गाणि तैः कृतानीह सप्त स्वर्गसमानि च । सद्वाराणि सयन्त्राणि सकपाटनिभानि च । कोटिकोटिभटाढ्यानि सर्वर्द्धिसहितानि च । सुवर्णरूप्यताम्रैश्च कांस्यरीतिकसीसकैः । अयस्कान्तेन कान्तानि रत्नान्यग्रलिहान्यपि । ततः शैलं महादुर्गं तैः काशी परितः कृतम् । परिखापि कृता निम्ना मत्स्योदर्य्या जलाविला । मत्स्योदरी द्विधा जाता वहिरन्तश्चरी पुनः । तच्च तीर्थं महाख्यातं मिलितं गाङ्गवारिभिः । यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह । तदा मत्स्योदरीतीर्थं लभते पुण्यगौरवात् । सूर्य्याचन्द्रमसोः पर्वतदा कोटिगुणं शतम् । सर्वपर्वाणि तत्रैव सर्वतीर्थानि तत्र वै । तत्रैव सर्वलिङ्गानि गङ्गा मत्स्योदरी यतः । मत्स्योदर्य्यां हि ये स्नाता यत्र कुत्रापि मानवाः । कृतपिण्डप्रदानास्ते न मातुरुदरेवसाः । अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात् । परितः स्वधुनीवारिसंसारोपरि वीक्ष्यते । मत्स्योदर्य्यां कृतस्नाना ये नरास्ते नरोत्तमाः । कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम् । किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः । यदि मत्स्योदरीस्नाताः कुतो गर्भभयं ततः । यत्र यत्र हि लिङ्गानि नृदेवर्षिकृतान्यपि । तत्र मत्स्योदरीं प्राप्य सुस्नातो मोक्षभाजनम् । सन्ति तीर्थान्यनेकानि भूर्भुवः स्वर्गतान्यपि । न समानि परन्तानि कोट्यंशेनापि निश्चितम् । इत्थं तीर्थं कृतं तेन विभो ! । कैलासवासिनः । गणाधिपेन सुमहत्सु महोदरकर्म्मणा । भूर्भुवःसंज्ञकं लिङ्गं पर्वताद्गन्धमादनात् । स्वयमाविरभूदत्र तस्मात् प्राच्यां गणाधिपात् । विलोक्य भूर्भुवं लिङ्गं भूर्भुवःस्वर्महः परे । निवसन्ति जनाः पुण्याः सुचिरं दिव्यभोगिनः । हाटकेशं महालिङ्गं भोगवत्या समायुतम् । सप्तपातालतलत इहायातं स्वयं विभो ! । शेषवासुकिमुख्यैश्च तत्प्रासादो महानिह । मणिमाणिक्यरत्नौघैर्निरमायि प्रयत्नतः । तल्लिङ्गं हाटकमयं रत्नमालाभिरर्चितम् । ईशानेश्वरतः प्राच्यां पूजनीयं प्रयत्नतः । भक्तितोऽभ्यर्च्य तल्लिङ्गं नरः सर्वैः समृद्धिमान् । क्त्वा भोगभुनसंख्या-